# अनुच्छेद-लेखन 16

## 1. अस्माकं देशः (भारतवर्षः)

यस्मिन् देश वयं निवसामः स भारतवर्षः अस्ति। अयं हि हिमालयात् रामेश्वरम् पर्यन्तम् पुरीतः द्वाराका पर्यन्तं प्रसृतः अस्ति। अत्र गंगा, यमुना, ब्रह्मपुत्रप्रभृतयः नद्यः अमृतोपमं तोयं वहन्ति। काशी, प्रयाग, अयोध्या, वृन्दावन, देवघरः, मथुराप्रभृतयः तीर्थ नगर्यः सन्ति। कोलकाता, मुम्बई, चेन्नै, दुर्गापुर, जमशेदपुरप्रभृतयः उद्योग प्रधानाः नगर्यः सन्ति। अत्रैव राम-कृष्ण-गौतम-गांधीः जाता। महात्मा गांधी राष्ट्रपिता अस्ति। अयं देशः कृषि प्रधानः अस्ति। अस्य राष्ट्रभाषा हिन्दी अस्ति देवभाषा च संस्कृतः अस्ति। हिन्दी भाषा संस्कृतभाषायाः आत्मजा अस्ति।

## 2. विद्याधनं सर्वधन प्रधानम्

विद्याधनं सर्वधन प्रधानं कथ्यते। विद्या विनयं ददाति। विनयात् पात्रता आयाति। विद्यया सद्सद् वस्तु विवेकः भवति। जीव विद्यया मोक्षं लभते। इयं हि विप्रा गौरवम् ददाति। विद्वान् सर्वत्र पूज्यते। विद्याधनं दानेन वर्द्धते। इदं संचयेन क्षयं गच्छति। इदं बन्धुभिः न वण्ट्यते। चोरैः न अपह्यते। विद्यया जनः इहलोके परलोके च सौख्यम् आप्नोति। अस्माभिः विद्या अर्जनीय।

## 3. राष्ट्रभाषा हिन्दी

हिन्दी अस्माकं राष्ट्रभाषा अस्ति। विश्वे 2796 भाषाः सन्ति। हिन्दी भाषा अतीव सरला अस्ति। अस्यां भाषायां भारतस्य अधिकाः जनाः वार्तालापं कुर्वन्ति। इयं हि सुवोधा भाषा अस्ति। अल्पकालेन अस्यां जनाः कुशलाः भवन्ति। अस्याः साहित्यम् अतिसमृद्धम् अस्ति। इदानीं अहरहः अस्याः विकासः भवति। अस्याम् एव सूर, कबीर, तुलसी, प्रसाद, वर्मा, निराला, मुक्ति बोधः प्रमुखः कवयः विराजन्ते। अस्याः उन्नतिः एव राष्ट्रस्य उन्नतेः मूलम्। अतः अस्माभिः सदा अस्याः भाषायाः व्यवहारः कर्त्तव्यः।

## 4. देशभक्तिः (जननी जन्मभूमिश्च स्वर्गादपिगरीयसी)

''मातृभूमिः, पितृभूमिः कर्मभूमिः सुजन्मनाम्।
भक्तिर्महति देशोऽयं सेव्यः प्राणर्धनैरपि॥''

यस्मिन् देशे वयं जन्मधारणं कुर्मः स हि अस्माकं देशः जन्मभूमिः वा भवति। जननी इव जन्मभूमिः पूज्या अदरणीया च भवति। अस्याः यशः सर्वेषां देशवासिनां यशः भवति। अस्याः गौरवेणा एव देशवासिनां गौरवम् भवति। ये जनाः स्वाभ्युदयार्थ देशस्याहितं कुर्वन्ति ते अधमाः सन्ति। देशभक्तिः सर्वासु भक्तिषु श्रेष्ठा भवति। अनया एव देशस्य स्वातंत्र्यरक्षा भवति। अनया एव प्रेरिताः बहवः देशभक्ताः भगत सिंहः, चन्द्रशेखरः, गांधी, सुभाषचन्द्र प्रभृतयः आत्मोरसर्गम् अकुर्वन्। देशभक्ति तरेव व्यक्ति समाज देशकल्याणार्थं परमम् औषधम् अस्ति।

www.classroomnotes.in

## 5. संस्कृत भाषा

संस्कृत भाषा देवभाषा इति कथ्यते। एषा हि सुरभारती कथ्यते। अस्याः व्याकरणम् तस्य पाणिनि निर्मितानि सूत्राणि च जगतः सर्वातिशयम् आश्चर्यम्। यस्यां भाषायाम् एव व्यास, वाल्मीकिः, कालिदास, भवभूति, अम्बिका दत्त व्यासः प्रभृतीनां कविपंगवानाम् वाणी संरक्षिता वर्त्तते। व्याकरण-व्याय वेदान्तादि विषयेषु महती विवेचना अस्याम् एव दृश्यते। अन्या भाषया एव भारतस्य एकता भवितुं शक्नोति। एषा एव सर्वासाम् आधुनिकानां भाषाणाम् जननी अस्ति। अस्या शब्दभंडारः अक्षयः अक्षुण्णाश्च सदा वर्त्तते। एषा विश्वस्य प्राचीनतमा सुष्ठुतमा च भाषा। अस्याम् एव चत्वारो वेदाः, षट् वेदान्ताः, 108 उपनिषदाः सन्ति। अस्याः माध्यकेनैव आर्याणाम् अद्यापि सर्वे संस्काराः सम्पन्नाः भवन्ति।

## 6. महात्मा गांधी

राष्ट्रपितुः महात्मनः गांधी महोदयस्य प्रयत्नेनैव भारतं स्वतंत्रं जातम्। तस्य महान् उपकारः देशोपरि विद्यते। स्वतंत्रता संग्रामे पं. जवाहरलाल नेहरू, राजेन्द्र प्रसादः, पटेलः, आजादः, बोसादि नेतारः तस्य सहायकाः आसन्। गांधी इमं देशं स्वतंत्र विधाय अत्र प्रजातन्त्र शासनम् स्थापितवान्। महात्मा गांधी, 'हरिजन', 'नवजीवन', इत्यादि मातृभाषा समाचार पत्रै, 'यंग इंडिया' आँग्ल समाचार पत्रेण च इमं देश शिक्षितवान्। प्रथम कयं देशः अंग्रेज शासकानाम् शासने आसीत्। महता प्रयत्नेन अनेकेषां देशभक्तानां बलिदानेन, द्वितीय महायुद्धस्य प्रभावेन बहूनां देशानां परामर्शेण चायं देशः स्वतंत्रः जातः। अस्य महापुरुषस्य जन्म अतः दशाधिकशत वर्षाणि पूर्व देशस्य गुर्जरप्रान्ते पोरबन्दरे जातम्। अक्तूबर मासस्य द्वितीया तिथिः अस्य जन्मदिवसः अस्ति। स्वतंत्रता प्राप्तेरनन्तरं यदि स महात्मा अजीविष्यत् तदा देशः उन्नतिम् अकरिष्यत्।

## 7. पं. जवाहरलाल नेहरू

पं. जवाहर लाल नेहरू स्वतंत्र भारतस्य प्रथम प्रधानमंत्री आसीत्। तस्य पिता पं. मोतीलाल नेहरू अपि महान् देशभक्तः, स्वतंत्रता संग्रामस्य महान् नेता आसीत्। कश्चित् पुत्रः पितरमति क्रम्य नाम, यशश्च लभते इति जवाहर लाल नेहरूः प्रथमः उदाहरणः। प्रयाजे जन्म लब्ध्वा प्राथमिकीं शिक्षां प्राप्य इंगलैंड नाम्नि देशे शिक्षां प्राप्तुं गतवान्। ततः विधिशास्त्रे सर्वोत्तम उपाधि लब्ध्वा स्वदेशमागतवान्। पिता सहैव प्रयाग उच्च न्यायालये वैरिस्टर कर्म कर्तुमारभत्। तदैव महात्मनः गांधिनः, राजेन्द्र प्रसादस्य च प्रभावेन्, पितुश्य प्रेरणया शिक्षया च देशस्य स्वतंत्र्यार्थम् आत्मानं समर्पितवान्। सप्तचत्वारिंशदुत्तरोन विंशतितमे वर्षे अगस्त मासस्य पञ्चदशे दिवसे यदा देशः स्वतंत्रः अभवत् तदा स एव प्रथमः प्रधानमंत्री अभवत्। महान्तं कालं देशस्य शासनम् मार्गदर्शनञ्च कृत्वा यदायमुपरतः तदा देशः अत्यन्तं शोकाकुलं अभवत्। तदन्तरम् किंचित् कालमितिक्रम्य तस्यैव पुत्री श्रीमती इन्दिरा गांधी देशस्य प्रधानमंत्रिणी भूत्वा एकादश वर्षाणि शासनम् अकरोत्।

## 8. देशरत्नः डॉ. राजेन्द्र प्रसाद

डॉ. प्रसादस्य जन्म बिहार राज्ये सीवानमण्डलस्य जीरादेई ग्रामे अभूत् । तस्य पितुः नाम महादेव सहायः आसीत्। राजेन्द्र प्रसादः प्राथमिकी शिक्षा ग्रामे एव लब्धवान्। अनन्तरं छपरा जिला स्कूल नाम्नि विद्यालये पठित्वा कोलकाता विश्वविद्यालयस्य इन्ट्रेंस-परीक्षायां सर्वोत्तमं स्थानं प्राप्तवान्। ततः विश्व-विद्यालयात् वैरिस्टरोपाधि प्राप्त पटना उच्चन्यायालये वैरिस्टर कर्म आरब्धवान्। तस्मिन् कर्मणि सः अतीव मेधावी ख्यातिलब्धश्चासीत्। यदा महात्मा

गांधी चम्पारण- मंडले नीलहा-गौरांग-लोकानाम् अत्याचारेण पीडितान् जनान् त्रातुं यात्रां कृतवान् तदा प्रसादः तेन सहैवासीत्। पश्चात् सः बिहार प्रान्ते, अनन्तरं देशे च स्वतंत्रता संग्रामस्य महान् कर्णधारः अभवत्। देशभक्तेः प्रेरणाया प्रेरितः अनेकबारम् कारागार यात्रामपि कृतवान्। देशस्य स्वतंत्रता प्राप्तयनन्तरं मंत्रिमंडले खाद्यमंत्रीपदमलं कृतवान्। पश्चात् देशे गणतंत्र घोषिते अयमेव प्रथमः राष्ट्रपतिः निर्वाचितः। कृषकपुत्र एव देशस्य राष्ट्रपतिः भवितुमर्हतीति महात्मनः गांधिनः सफलः जातः।

### 9. स्वामी विवेकानन्दः

विवेकानन्दस्य प्रथमनाम नरेन्द्रः आसीत्। अयं रामकृष्ण परमहंसस्य शिष्यः। कोलकातानगरे दक्षिणेश्वरे काली मंदिर तस्योपसना केन्द्र मासीत्। असौ अंग्रेजी-बंग-संस्कृत-साहित्यानां महान् पंडितः दर्शनशास्त्रे च तस्य विशेषाधिकारः आसीत्। देशवासिनां दुर्दशां पराधीनताञ्च विलोक्य अस्य मनः उद्विग्नः अभवत्। अमरीकायां शिकागोनाम्नि नगरे अखिलविश्वधार्मिक सम्मेलने भाषणं कृत्वा अयं परमां ख्याति प्राप्तवान्। देशे पांडिचेरी, चेन्नै आदि स्थानेषु कियत्कालं स्थित्वासौ अल्मोडा नगरम् आगत्य 'प्रबुद्ध भारत' इति समाचर पत्रं प्रकाशितवान् अयं युगपुरुषः अस्माकं देशे संसारे प्रातः स्मरणीयः अस्ति।

### 10. छात्रजीवनम् तपस्वीजीवनम्

छात्रजीवनम् तपस्वी जीवनम इति कथ्यते। चतुर्विधः आश्रमः भवति। चतुर्षु आश्रमेषु ब्रह्मचर्यः प्रमुखः भवति। अस्माकं जीवनस्य अयमेव निर्माणकालः। यथा क्रियते तथैव भुज्यते च। अद्यत्यः छात्रः श्वः नेता भविष्यति। अतएव छात्रजीवन सफलतायाः कुञ्जिका वर्तते। छात्रजीवने सदाचारस्य संयमनियमपालनस्य महिमा गरीयान् वर्तते। सफलं छात्रजीवनं मानवतायाः विकास- क्रमे प्रथमं सोपानम्। सर्वेषां महापुरुषाणां छात्रजीवनं महत्वपूर्णम् आसीत्।

### 11. परोपकारः

परोपकारः मानवजीवनस्य परमलक्ष्यं वर्तते। सज्जनानां कायः चन्दनेन आभूषणेन वा न, अपितु परोपकारेणैव विभाति। महाभारत कारेण व्यासेन कथितम्—"परोपकारायः पुण्याय पापाय परपीडनम्।" सतां विभूतयः परोपकाराय एव भवति। जगतः सारभूतः परोपकारः सर्वैः जनैः सततं सर्वत्रैव सम्पादनीयः। परोपकारः दैवः भावः अस्ति। अस्य भावस्य उदयेन एव समाजस्य देशस्य च प्रगतिः भवति। अचेतनाः परोपकर्मणि रताः दृश्यन्ते। मेघाः परोपकाराय जलं वहन्ति। नद्यः अपि स्वीयं जलं न स्वयं पिबन्ति। एवं हि सज्जनाः परोपकाराय एव जीवनम् धारयन्ति

### 12. सत्संगतिः

सतां सज्जनानां वा संगतिः सत्संगतिः कथ्यते। सज्जनानां संगया हृदयं विचारं च पवित्रं भवति। अनया जनः स्वार्थभावं परित्यज्य लोक कल्याणकामः भवति। दुर्जनानां संगत्या दुर्बुद्धि आगच्छति। दुर्बुद्धि दुःखजननी अस्ति। सज्जनानां संगत्या दुर्जनः अपि सज्जनः भवति। दुर्जनानां संगत्या सज्जनः अपि दुर्जनः भवति। सतां सङ्गः सर्वेषां लोकानां जीवने मंगलम् आतनोति। सत्संगतिः धियः जाड्यं हरति। पापात् निवारयति। सत्संगतिः परमात्मनः प्रसादात् एव लभ्या भवति। अतः, साध्विदमुच्यते—"सत्संगतिः कथय किं न करोति पुंसाम्।"

**13. उद्यमः**

उद्यमः उद्योगो वा मानवजीवने सर्वसमृद्धीनां जनको वर्तते। सुनिश्चित लक्ष्यं प्रति संकल्पितेन मनसा श्रमपूर्वकं कृतं कर्म उद्यमः अभिधीयते। उद्यमः एव अस्माकं सर्वाणि कर्माणि नियोजयति। मनः प्रेरयति, उत्साहं संचारयति कार्यकुशलतां चं विवर्धयति। सत्यमेव कथितम्—''उद्यमेन हि सिद्धयन्ति कार्याणि न मनोरथैः।'' उद्यमी लोकः राष्ट्रो वा सर्वत्र जयं लभते। उद्योगिनम् पुरुषसिंहमुपैति लक्ष्मीः। उद्यमे विना सर्वसमर्थः अपि कष्टं सहते। उद्यमेन एव जीविकोपार्जनम् भवति। अयमेव विद्या अधिगम्यते।

**14. गङ्गा नदी**

अस्माकं देशस्य सर्वासु नदीषु गंगा श्रेष्ठा इयं हिमालयात् निःसृत्य बंगसागरे पतति। अस्याः पावने तटे बह्व्यः विशालाः प्राचीनः नगर्यः स्थिताः सन्ति। अस्माकं सभ्यता-संस्कृति एषु नागरेषु उन्नता जाता। गंगाजलम् अति स्वच्छम् आसीत। परन्तु अधुना इयं जलम् अस्वच्छम्। श्रूयते, पुराकाले नृपवरेण भगीरथेन इयं नदी घोरतपसा स्वर्गात् पृथ्व्याम् आनीता। गंगायाः पुण्योदकेषु स्नानं सर्वकल्मषापहं मन्यते।

**15. ग्रामः**

राष्ट्रपितुः महात्मनः गांधिनः शब्देषु भारतवर्षम् ग्रामाणां देशः वर्तते। महाकवि पंतस्य शब्देषु—''भारतमाता ग्रामवासिनी।'' अस्मिन् देशे पञ्चलक्षाधिकाः ग्रामः सन्ति। ग्रामस्य प्रकृति सौंदर्यम् अतीव मनोहरं भवति। ग्रामीणाः अतिसरलाः सज्जनाः आतिथ्यपरायणाः भवन्ति। ग्रामेषु अमराई शस्यपूरितक्षेत्राणां शोभाः केषां चित्तानि न हरन्ति?

**16. अस्माकं ग्रामः**

अस्माकं ग्रामः बिहार प्रदेशस्य बेगूसरायमंडले अस्ति। अस्य नाम नावकोठी अस्ति। अयं हि गंडकतटे अस्ति। ग्रामं परितः आम्रवृक्षाः सन्ति। ग्रामं निकषा राजपथः अस्ति। ग्रामे ब्राह्मणः, भूमिहारः, वैश्याः शूद्राश्च निवसन्ति। अत्र शूद्राः निर्धनाः सन्ति। ग्राम प्रधान शिक्षितः उदारः चास्ति। अत्रत्याः जनाः कृषिकर्मे व्यापारं च कुर्वन्ति। अस्माकं ग्रामे बी.पी.एस. विद्यालयः अस्ति। अस्मिन् विद्यालये पंचशत छात्राः अध्ययनं कुर्वन्ति। यदा हि क्षेत्राणि शस्यपूर्णानि भवन्ति तदा अस्य शोभा दर्शनीया भवति।

**17. पुस्तकालयः**

नानाविषयविभूषित पुस्तकानाम् आलयः इति पुस्तकालयः। पुस्तकालयः सर्वजनानां प्रियः तेषां मध्ये ज्ञान विज्ञानयोः प्रसारकः भवति। विदुषां मते पुस्तकालयः ज्ञानभाण्डारः अस्ति। पुराकाले भारतवर्षे अनेके विश्वविख्याताः पुस्तकालयः आसन्। अस्माकं ग्रामे अपि एकः पुस्तकालयः अस्ति। अस्य नाम 'सीताराम पुस्तकालयः' अस्ति। त्रिविधः पुस्तकालयः—व्यक्तिगतः, विद्यालयीयः, सार्वजनिकश्च। व्यक्तिगत पुस्तकालयः अध्यापकानां अन्येषां बुद्धिजीविनाम् च भवति। विद्यालयीः विद्यालयस्य अंगं भवति। सार्वजनिकेषु पुस्तकालयेषु बहूविधानि पुस्तकानि भवन्ति। सीताराम पुस्तकालयः सार्वजनिक पुस्तकालयः अस्ति। अत्र जनाः अध्ययनं कुर्वन्ति ज्ञानं च प्राप्नुवन्ति।

**18. प्रिय कविः**

अस्माकं प्रियः कविः तुलसीदासः अस्ति। स हि रामचरितामानस्य प्रणेता अस्ति। तस्य इदम् पुस्तकं भारतस्य भारतीयानां च कण्ठाभरणम् अस्ति। अनेन पुस्तकेन कविशिरोमणिः

भारतीय संस्कृतेः संरक्षणम् चकार। अस्मिन् पुस्तके रामाय चरितं उल्लिखितम् अस्ति। सरलहिन्दीभाषायां लिखितम् इदं पुस्तकं अल्प ज्ञानां बहुज्ञातां च कृते अनुशीलनम् अस्ति। अत्र रामस्य चरित्रम् अनुकरणीयम् अस्ति। गोस्वामी तुलसी दासः अद्वितीयः कविः अस्ति। सौंदर्यवर्णनि काव्य प्रतिभायां च तुलसीदासः अद्यापि अप्रतिमः वर्तते।

### 19. पर्वतराज हिमालयः

पर्वतराज हिमालयः भारतस्य उत्तरस्यां दिशि वर्तते। अस्य विभिन्न भागेषु अमरनाथ, केदारनाथ, बदरीनाथ, पशुपतिनाथ प्रभृतीनि प्रख्यातानि तीर्थानि सन्ति। अस्य गिरिवरस्य क्रोडे नाना पुष्प-फल-समृद्धानि हरित काननानि सन्ति। अस्मात् हिमालयात् अनेकाः नद्याः प्रभवन्ति। अस्माकं देशस्य शिरोमुकुटोऽयं हिमालयः उत्तरस्यां दिशि आक्रमणकारिभ्यः अस्माकं प्रहरीव वर्तते। हिमालयः सम्पूर्णभूभागे पर्वतानां राजा। हिमालयः अस्माकं शक्तिस्रोत रूपेण विराजते। अस्य महिमानं कवयो, शास्त्रकाराः ऋषयः मुनयश्च गायन्ति। अस्मिन्नेव औषधीनां प्रचुर परिमाणः प्राप्यते।

### 20. मम विद्यालयः

अहं बी. पी. एस. विद्यालये पठामि। अस्य भवनम् भव्यं श्वेतवर्णं चास्ति। अस्य प्राचार्यः बहुज्ञः, व्यवहारकुशलः, छात्रप्रियश्च अस्ति। अत्र विंशतिः शिक्षकाः सन्ति। एते सर्वे सुयोग्याः सन्ति। अत्र बहवः छात्राः पठन्ति। सर्वे छात्राः अनुशासनप्रियाः सन्ति। विद्यालयस्य क्रीडाक्षेत्रं सुविस्तृतं हरितदूर्वाच्छन्नम् चास्ति। सायंकाले शनिवारे च अत्र छात्राः खेलन्ति। सरोज कुमारः मम क्रीडाशिक्षकः। अयं विद्यालयः अस्माकं गौरवस्पदम् अस्ति। अत्र प्रत्यब्दं समारोहाः भवन्ति। अत्र छात्राणां शारीरिक-मानसिक-बौद्धिक-अध्यात्मिक योग्यता विकासाय अहर्निशं प्रत्यत्पते। मम विद्यालयः अतीव सुन्दरः अस्ति।

### 21. विद्यालयोत्सवः

सर्वेषु विद्यालयेषु उत्सवाः भवन्ति। अस्माकं विद्यालये 17 अप्रैलमासे विशेषोत्सवः भवति। अस्मिन् वत्सरे एषः उत्सवः विशिष्टः आसीत्। प्रातः काले छात्राः शिक्षकाश्च अत्र आगच्छन्ति। भाषणं, गीतं, नृत्यं, नाटकं च भवति। सर्वे छात्राः अत्रैव खादन्ति। पुरस्कार वितरणं भवति। क्रीडाप्रतियोगितापि भवति। विगत वर्षे एकः वैज्ञानिकः आगच्छत्। तस्य नाम डॉ. रामनिवासः अस्ति। सः कृषि वैज्ञानिकः अस्ति। तस्य भाषणं अतीव मधुरं अभवत्। अस्मिन् दिवसे अयं विद्यालयः स्थापितः।

### 22. बसन्तः

बसन्तः रमणीयः ऋतुः अस्ति। इदानीं शीतकालस्य भीषण शीतलता न भवति। मन्दं-मन्दं वायुः वाति। विहंगाः कूजन्ति। भ्रमराः गुञ्जन्ति। तितलिकाः नृत्यन्ति। पुष्पाणि विकसन्ति। विविधैः कुसुमैः पादपाः आच्छादिता भवन्ति। धान्येन धरणी परिपूर्णा भवति। कृषकाः प्रसन्नाः दृश्यन्ते। कोकिलाः मधुरं गायन्ति। आम्रेषु मंजर्यः दृश्यन्ते। मंजरीभ्यः मधु स्रवति। समशीतोष्णाऽस्मिन् ऋतौ नैसर्गिक सौंदर्यस्य चरम समृद्धिः दृश्यते। कवीनां मध्येऽपि ऋतुराज वसन्तस्य शोभा अतिशय प्रश्रयं प्राप्ता तेषां काव्येषु मुहुर्मुहुः वर्णिता प्रशंसिता च वर्तते। वसन्तः ऋतुराजः इति मन्यते।

### 23. वर्षाऋतुः

ऋतुराज्ञी वर्षा कस्य जनस्य मनो न हरति। वर्षाराज्ञाः पदार्पणस्य तत्पश्चात् वसुन्धरायां विलासस्य कालः एव वर्षाकालः। वर्षाकाल्स्य शोभा अतीवरमणीया भवति। मन्द पवन

प्रेरितानि हरित क्षेत्राणां शस्यदलानि सर्वेषां विलोकयतां चित्तानि आकर्षयन्ति। नराणां जीवनाधारस्य अन्नस्य उत्पतिकालोऽपि कर्षाकालाश्रितः एव वर्तते। वर्षाकालः सुखकरः भवति। अस्मिन् काले आकाशे मेघाः भवन्ति। आकाशः मेघच्छन्ना भवति। ग्रीष्मकालस्य आतपस्य शान्तिः भवति। सराः जलपूर्णाः भवन्ति। पन्था कर्दमपूर्णः भवति। मण्डूकाः जलाशयेषु गीतं गायन्ति। नमसि इन्द्रधनुः अतीव रमणीयं दृश्यते।

## 24. शरद् ऋतुः

आश्विन-कार्तिक-मासौ शरद् ऋतुः भवतः। वर्षाकाले समाप्ते प्रतिवर्षम् अयं ऋतुः महतामुत्सवानां समूहः भवति। आकाशः निर्मलः भवति। चन्द्रः प्रकाशते। कमलानि पुष्पाणि च विकसन्ति। विविधानि पुष्पाणि पादपेषु, लतासु च जायन्ते। अस्मिन्नेव ऋतौ शालिः फलति, सरांसि, नद्यः स्वच्छ जलेन पूरिताः भवन्ति। लोकाः शेषरात्रौ उत्थाय स्वे-स्वे कर्मणि लग्नाः भवन्ति। वसन्तं विहाय अयमेव ऋतुः सर्वेषां महत्तरः। दुर्गापूजा, दीपावली प्रभृति पर्वाणि अस्मिन्नेव ऋतौ स्थानं लभन्ते। अतएव, इयं शरत् संस्कृति-सौरभ-मोदिता अपि दृश्यते।

## 25. ग्रीष्मकालः

निदाधः कष्टकरः ऋतुः वर्तते। अस्मिन् काले नभे उच्चैः स्थितः भानुः प्रचण्डतापेन तपति। धूलपूरिता वाताः वान्ति। प्रत्यक्षरूपेण कष्टकरोऽयं ऋतुः प्रावृड्मेधानाम् उत्पत्तिकारकः वर्तते। ग्रीष्मकाले पाटलसुरभिस्मोदित पवनाः स्नानकाले शीतलजल स्पर्शाः अतीव सुखकराः भवन्ति।

## 26. व्यायामः

विशेषेण आयामः शरीरङ्गाणां नियमानुसारं सञ्चालनं व्यायामः उच्यते। स्वस्थे शरीरे स्वस्थात्मा निवसति। भ्रमण धावन-क्रीडनादिभिः शरीरं श्रान्तकरणम् व्यायामः कथ्यते। व्यायामः नित्यं करणीयः भवति। अस्य निष्ठानुष्ठानेन गात्राणि पुष्टानि भवन्ति। शरीरे द्रुतं रक्त संचारः भवति। प्रस्वेदैः शरीरात् आमयं विषं च निर्गच्छति। स्वस्थः जनः सुयोग्यः नागरिकः भवति। देशसेवां स्वस्थाः एव नागरिकाः कुर्वन्ति। स्वास्थ्यम् हि धर्मादिकाममोक्षाप्रापकं भवति। नियमित व्यायामेन शरीरस्य सर्वेषु भागेषु रक्त संचारो सम्यक् जायते, रोगाः नश्यन्ति, पाचन शक्तिः वर्धते, मनसि च स्फूर्तिः उदेति। अतएव, अस्माभिः व्यायामः कर्त्तव्यः।

## 27. संघे शक्तिः कलौ युगे (एकता)

एकमतिं प्राप्तानां सर्वेषां जनानां लक्ष्यं प्रति सङ्घटिता शक्तिः एव एकता अभिधीयते। एकता एव सा महाशक्तिः यया सर्वाणि दुष्करकर्माणि सम्पाद्यन्ते साध्यन्ते वा। इयम् एकता एव लोकं, समाजं, देशं विश्वं च प्रगतिपथमधिरोहयति। वर्तमानयुगे तु एकतायाः महत्वं सर्वोपरि बर्तते। एकतायाः अभावे स्वकीयानाम् अधिकाराणां रक्षणं नैव सम्भवं वर्तते। एकाकिना किमपि कार्यं न तथा फलदायकं यथा संघेन। सत्यं कलौ काले संघ एव सर्वार्थसाधकः वर्तते। कथ्यते च—

"यत्र-यत्र संघं तत्र-तत्र बलं च।"

## 28. प्रजातन्त्रम्

प्रजातन्त्रम् संसारे सर्वासु राज पद्धतिसु अनुत्तमं कथ्यते। यद्यपि जगति शासनस्याकेकानि रूपाणि प्रचलितानि सन्ति तथापि राजतन्त्रम्, गणतन्त्रम्, अधिनायकतन्त्रम्, सैनिक तन्त्रम्,

साम्यवादि तन्त्रम् एवम् सर्वाणि शासनस्वरूपाणि अतीत्य प्रजातन्त्रम् सर्वोपरि विराजते। अस्मिन्नेव तन्त्रे प्रजाः शासन कार्येषु प्रत्यक्षमुत्तरदायित्वं वहन्ति। मतदान प्रणाल्या शासन व्यवस्थां स्वीकर्तुम् अस्वीकर्तुम् चाधिकारः तासां भवति। अस्माकं देशे इमामेव व्यवस्थां स्थापयितुं सर्वे राष्ट्र सेवकाः प्रयतिताः अधुना इयं व्यवस्था विवादास्पदा अस्ति।

### 29. पत्रलेखनम्

पत्रलेखनम् एका उपयोगिनी कला वर्तते। सामाजिक जीवने अस्माभिः प्रतिपदम् अस्य आवश्यकता अनुभूयते। पत्र लेखनं विविध प्रकारं भवति। यथा व्यक्तिगतः, व्यावसायिकश्च। भाषायाः सम्यक् ज्ञानं शब्द भंडारस्य समृद्धिश्च सुष्ठु पत्रलेखनस्य अनिवार्य तथा अपेक्षितौ गुणौ। पत्रलेखनस्य दक्षता निरन्तराभ्यासस्य परिणामः भवति। पत्रलेखनस्य ज्ञानं छात्राणां कृते परमावश्यकं भवति। पगे-पगे अस्य आवश्यकता अनुभूयते अस्माभिः। अतएव पत्रलेखनस्य अभ्यासः नित्यं कर्त्तव्यः।

### 30. पर्यावरणरक्षा

पर्यावरणरक्षायै प्रत्येकं नरः निवासपरिसरे तरुणां रोपणम् अभिरक्षणं च कुर्यात्। अस्माकं गृहस्य प्रांगणे पुष्प पादपाः रोपणीयाः। राजमार्गम् उभयतः छाया वृक्षाः भवेयुः। गृहं स्वच्छं सुप्रकाशितं च भवेत्। सर्वे प्रदूषण प्रसार-पराः उद्योगाः नगराद् ग्रामाद् वा दूरे स्थापनीयाः। दूषितानि जलानि गंगादिनदीषु न पतेयुः। तैलरहित-वाहनानां संख्या न्यूना भवेत्। कर्मस्थलानि प्राकृतिक सौंदर्येण विभूषितानि स्युः। पर्यावरणास्य विनाशकः दण्डितः स्यात्।

## प्रश्न-अभ्यास

### बोर्ड परीक्षाओं के लिए

**A. अधोलिखितेषु विषयेषु अनुच्छेदं लिखत—**

| विषयः | संकेताः |
|---|---|
| 1. मम प्रियं मित्रम् | प्रियमित्रम्, युवकः, प्रतिवेशी, मिलित्वा, गृहकार्यम्, गुणान् प्रकटयति, क्रीडासु रुचिः |
| 2. मम प्रियः शिक्षकः | प्रियः शिक्षकः, मधुर स्वभावः, सम्मानं, छात्राणां सहायतां, पुस्तकानि, संस्कृत भाषणम् |
| 3. दीपावली | प्रकाशोत्सवः, कार्तिक, अमावस्या, श्रीरामस्य आगमनम्, लक्ष्मीपूजा, होमादिकम्, मिष्टान्नं, दर्शनीया शोभा |
| 4. विज्ञानस्य चमत्कारः | प्रत्येक क्षेत्रं, सर्वविधं सौविध्यम्, यातायाते, सूचनाक्षये, संगणकक्षेत्रे, मानवलाभाय, पर्यावरणरक्षणे सावधानता |
| 5. आदर्शः छात्रः | जीवनस्य आधारः छात्रजीवनम्, नियमिश दिनचर्या, समयस्य सदुपयोगः, ब्रह्मचर्यम्, गुणग्राही, अध्यापकानां सम्मानम्, सर्वांगीण विकासः |
| 6. अनुशासनम् | नियमपालनम्, आज्ञापालनम्, संविधानस्य नियमाः, उत्तमः नागरिकः, समाजोत्थानम्, संघटनस्य आधारः, प्रकृतौ अनुशासनम् |
| 7. गणतन्त्र दिवसः | राष्ट्रीय पर्व, 26 जनवरी, पूर्णस्वतंत्रताघोषणा दिवसः, संविधानस्य आरम्भः |

| | |
|---|---|
| 8. स्वतंत्रता दिवसः | 15 अगस्त, रक्तदुर्गे ध्वजारोहणम्, प्रधानमंत्रिणःअभिभाषणाम् |
| 9. विजयादशमी | आश्विन शुक्लपक्ष-दशमी, रामस्य रावणो परिविजयः, रामलीला |
| 10. रेलयात्रा | आरक्षणाम्, यात्रापत्राणि, मार्गस्य दृश्यम्, रमणीया यात्रा |
| 11. जन्तुशाला | विशालता, सिंहाः, विविधदेशानां पशवः, पक्षिणः |
| 12. प्रियक्रीडा | क्रिकेटः, धावनूक्रीडा, दलद्वयम्, अधिक-व्ययं |
| 13. देशभक्तिः | देश-हितस्य चिन्तनं, अहिते किमपि न करणीयम्। इतिहास पुरुषः |
| 14. कृषकः | कृषि प्रधान देशः, कठिन श्रमम्, विष्णु अवतारं, सम्माननीय कार्यम् |
| 15. शिक्षक दिवसः | 5 सितम्बर, पवित्र दिवसः, सर्वपल्लीराधा कृष्णनस्य जन्म दिवसः समारोहः |
| 16. प्रदूषणम् | जल-वायु-ध्वनि-भूमि-प्रदूषणम्, उद्योगाः, आलस्यभावं, चिन्तिताः वैज्ञनिकाः, कर्त्तव्यम् |

★★★

www.classroomnotes.in